# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- आचार्य-१ (SEM-1) | प्रश्नपत्र-४ | गुणा: - ७० |
| विषय:- साहित्यम् – काव्यवर्ग: | CC-413(3) | समय: - ०३ त: ०६ |
| दिनाङ्क: - ०८/१२/२०१६ | सन्दर्भग्रन्थ: - भीष्मविजयम्- १ त: ४ उच्छ्वासा: | |

॥ प्रथमान्विति: ॥

**प्र-१ अधोनिर्दिष्टाभ्यामेकस्या: गद्यपङ्क्ते: ससन्दर्भं व्याख्यां कुर्वन्तु ।** **०४**

१. गुणगुह्या हि विदूरस्थमपि गुणसमृद्धं वस्तु तद्गुणगौरवेण हस्तावचेयमिा विभावयन्त: कथमपि समुपादित्सन्ते ।

२. अपवर्गान्तो हि सर्वोऽप्युद्यमो धान्यान्त इव कर्षणव्यापार: ।

**प्र-२ ग्रन्थकर्तु: परिचयं शैलीं च सविस्तरं लिखत ।** **१२**

**अथवा**

**भीष्यविजयग्रन्थस्य कथावस्तुविवेचनं विधीयताम् ।**

**प्र-३ प्रश्नद्वयस्योत्तरे लिखत ।** **०४**

१. राजन्यशिखामणे! इत्यस्य कोऽर्थ:? समासविग्रहपूर्वकं लिखत ।

२. भीष्यस्य पितु: नाम किमवर्तत?

३. भीष्यविजये आदौ कस्य देवस्य स्तुति: कृता?

॥ द्वितीयान्विति: ॥

**प्र-४ एकस्या: पङ्क्ते: ससन्दर्भं विवेचनं कुरुत ।** **०४**

१. वृथा वञ्चितोऽस्मि स्त्रीमय्या मायया ।

२. वयं च नातिकोविदानागरव्याहारेषु ।

**प्र-५ शान्तनो: विरहव्यथां सविस्तरं यथाग्रन्थं प्रतिपादयत ।** **०८**

**अथवा**

**द्वितीयोच्छ्वासस्य सारांशो लेख्य: ।**

**प्र-६ त्रयाणां प्रश्नानाम् उत्तराणि एकैकवाक्यै: दीयन्ताम् ।** **०३**

१. श्रेय: - इत्यस्य कोऽर्थ:?

२. गृहस्थाश्रम: कतम आश्रम:?

३. आजुरं इष नाम किम्?

४. देही - इत्यस्य कोऽर्थ:?

५. द्वितीय - उच्छवासस्य किं नाम?

॥ तृतीयान्विति: ॥

**प्र-७ ससन्दर्भं द्वयो: व्याख्यां कुरुत ।** **०४**

१. यथा सत्स्वप्यष्टसु विवाहेषु द्वावेव राज्ञां विहितौ गान्धर्वो राक्षसश्च । तयोरपि द्वितीय खलु प्रशस्यतर: । निरवकाशे हि तस्मिन् गान्धर्वोऽवकाशं लभते । बहून् गुणान् समीक्ष्य खलु राक्षसापरपर्यायं प्रसह्यकन्याहरणं वीरधुर्याणोमभ्यर्हितमुदाहमुद्वाहार्षुरार्या: । ननु विक्रमो हि प्रधान शिष्ट: क्षत्रियाणाम् न त्वर्याणामिवार्थलाभ: । स चैषामन्वाचयशिष्ट: ।

२. यथा यथा च स्वप्रौढिप्रकटनाय नातिप्रगाढं प्रहरत्याजमीढः तथा तथा स्वयमोजायमानो जितोऽसि जितोऽसि इति जगर्ज जितकाशी स सौभपतिः। जय जयेति तद्गर्जितमुजगर्जुश्चान्ये तत्सैन्या वर्षाभ्य इव स्तन स्तनविलौ। क्षणमेव क्रीडित्वा पुनः प्रहर्तुं प्रवृत्ते परबले प्रियसंप्रहारः स कुरूवीरस्तीलवापी कृषीवल इव युगपदनेकान् सायकान् वपन् इक्षुकाण्डभञ्जं भङ्क्त्वा तस्य कोदण्डदण्डं पशुमारमारयित्वा सधुर्यं सारथिवह्निसात्कृत्वा शताङ्गं तं साल्पं शरीरमात्रशेषं चक्रे।

३. ततः किं किमिति पर्युत्सुकेषु लोकेषु सहसा विगतेषु मङ्गलवाद्येषु निरुद्यमेषु पुरोहितवर्गेषु सभीष्मस्तां निर्दिशन्नुवाचशृणुतपरिषदाः एषा खलु काशीराजस्य ज्येष्ठा कन्या अम्बा नाम। एतेस्या अवरजे अम्बिकाम्बालिके। स्वयं वरस्थाएतास्तिस्त्रोऽपि वर्या राज्ञो विचित्रवीर्य दारार्थं समाहतवानस्मि।

**प्र-८ तृतीयोच्छ्वासस्य कथावस्तु विवेचयत।** **१२**

**अथवा**

**भीष्मस्य चरित्रचित्रणं विधीयताम्।**

**प्र-९ द्वयोः उत्तरं लिखत।** **०४**

१. विचित्रवीर्यः कः अवर्तत?

२. तृतीयोच्छ्वासस्य नाम लिखत।

३. अम्बिकाम्बालिके के आस्ताम्?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० एकस्य सविस्तरं ससन्दर्भं विवेचनं विधीयताम्।** **०४**

१. परा तपस्या हि दुःखिषु करुणा तापसानाम्।

२. पूज्यो हि वेदवान् वर्षीयांस्तपस्वी च द्विजातिः विशेषतो गुरुः।

**प्र-११ गुरुशिष्ययोः संवादं विवेचयत।** **०८**

**अथवा**

**चतुर्थोच्छ्वासस्य सारं लिखत।**

**प्र-१२ त्रयाणाम् उत्तराणि लिखत।** **०३**

१. भीष्मस्य गुरोः नाम किम्?

२. चतुर्थोच्छ्वासस्य नाम किम्?

३. क्षत्रान्तकः कः आसीत्?

४. दिवसकरकराः नाम किम्?

५. गाङ्गेयो नाम कः?